# Rishistutih

# ઋષિસ્તુતિઃ

## Document Information

Text title : Hymn to Ancient Rishis / Munis / Sages 2

File name : RRiShistutiH2.itx

Category : deities_misc

Location : doc_deities_misc

Proofread by : G.K.M Kartha

Description/comments : Goraksha Nikilavani page 12 2065_05

Latest update : October 15, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 15, 2022

*sanskritdocuments.org*

# ઋષિસ્તુતિઃ

વિશ્વામિત્ર વસિષ્ઠ વત્સ ભરત વ્યાસઙ્ગિરો ગૌતમાઃ
માણ્ડવ્યાત્રિ પુલસ્ત્ય ધૌમ્ય પુલહાઽષ્ટાવક્ર ગર્ગાદયઃ ।
માર્કણ્ડેય વિભાણ્ડકો શુક શતાનન્દાશ્વલોદ્દાલકા
વિશ્વે વૈદિકધર્મરક્ષક ઋષિવ્રાતાઃ સદા પાન્તુનઃ ॥ ૧॥

યાસ્કો ગાલવ યાજ્ઞવલ્ક્ય જનકો જાબાલ્યગસ્ત્યાદયો
ભારદ્વાજ ઉતથ્ય લોમશકૃપાઃ સૂતાદયઃ શૌનકઃ ।
દુર્વાસા ભૃગુ ભાર્ગવૌ ચ કુશિકઃ શાણ્ડિલ્ય ગાર્ગ્યાયણી
વિશ્વે વૈદિકધર્મરક્ષક ઋષિવ્રાતાઃ સદા પાન્તુનઃ ॥ ૨॥

નન્દી નારદ તુમ્બુરુશ્ચ કપિલો સૌબાષ્કલૌ દેવલઃ
સિધ્દાસ્તે સનકાદયોરહગણઃ કૌડિન્ય શિબ્યાદય ।
શૃઙ્ગી ગૌતમ શુષ્ય શૃઙ્ગ મનવો માન્ધાત મેધા ધ્રુવાઃ
વિશ્વે વૈદિકધર્મરક્ષક ઋષિવ્રાતાઃ સદા પાન્તુનઃ ॥ ૩॥

શકો દીર્ઘતમા દધીચિરુપમન્યઃ પિપ્પલાદાદયો
બાર્હસ્પત્ય કણાદ પાણિનિ બૃહસ્પત્યાસુરોન્દ્રાદયઃ ।
શઙ્ખઃ પઞ્ચશિખઃ પરાશર વૃષા મેધાતિથિર્મુદ્ગલો
વિશ્વે વૈદિકધર્મરક્ષક ઋષિવ્રાતાઃ સદા પાન્તુનઃ ॥ ૪॥

મૌદ્ગલ્યોઽથ ધનઞ્જયો સિત ભરદ્વાજા નલો ધર્મરાડ્-
માણ્ડવ્યાસાઙ્ગિરસૌ યયાતિ ભરતાઃ કણ્વોઽથ હારીતકઃ ।
શક્તિઃ કશ્યપ કાશ્યપૌચ્યવનકો વાત્સાયનશ્ચ ક્રતુ
વિશ્વે વૈદિકધર્મરક્ષક ઋષિવ્રાતાઃ સદા પાન્તુનઃ ॥ ૫॥

વૈશમ્પાયન પિપ્પલાયન બુધાસ્તૌ જહ્નુ કાત્યાયનૌ
ગોરક્ષો જમદગ્નિ જૈમિની શુનશ્શેપાશ્ચ સામશ્રવાઃ ।
ગાર્ગ્યઃ શાકલ શાકટાયન શકાઃ શાકસ્ય કૌત્સાદયો
વિશ્વે વૈદિકધર્મરક્ષક ઋષિવ્રાતાઃ સદા પાન્તુનઃ ॥ ૬॥

ભીષ્મો ભાગુરિ પિઙ્ગલૌ ચ સગરો દ્રોણઃ સહસ્રાર્જુનો
બુદ્ધો વામન કાસકૃત્સ્ન શબરાઃ પાણ્ડ્વમ્બરીષાદયઃ ।
આપસ્તમ્બ પતઞ્જલી પુરુરવાઃ પુષ્ય પૃથુઃ પાણ્ડવાઃ
વિશ્વે વૈદિકધર્મરક્ષક ઋષિવ્રાતાઃ સદા પાન્તુનઃ ॥ ૭॥

દેવાપિર્વરતન્તુ શન્તતુ ગદા દાલ્ભ્યોઽભિમન્યુર્વસૂ
રૈભ્યઃ સૌભરિ જૈબલી બલિ મિથી બૌધ્દ્રાયનો નૈમિષઃ ।
અશ્વત્થામ વિલેશયૌ દ્રુપદકો નેમિઃ મૃકન્ડુર્યમો
વિશ્વે વૈદિકધર્મરક્ષક ઋષિવ્રાતાઃ સદા પાન્તુનઃ ॥ ૮॥

આત્રેયો જનમેજય શ્રવણકઃ સ શ્વેતકેતુર્લવઃ
કાકુત્સ્થશ્ચ વિકુક્ષિ સઞ્જય મહાવીરાઃ સુધન્વોદયઃ ।
શ્વેતાશ્વો નચિકેત લક્ષ્મણ પુરુ શ્રીક્ષેમધન્વાદયો
વિશ્વે વૈદિકધર્મરક્ષક ઋષિવ્રાતાઃ સદા પાન્તુનઃ ॥ ૯॥

લૌકાક્ષી ચ વસન્તનો દયનકો સ વ્યાઘ્રપાદો જયઃ
શાલ્વઃ શૂર કુશધ્વજાઽજ વિદુરાસ્તેવાસુદેવાદયઃ ।
ઋક્સેના ઋતુપર્ણ કર્ણક દિવોદાસૈકલવ્યાદયો
વિશ્વે વૈદિકધર્મરક્ષક ઋષિવ્રાતાઃ સદા પાન્તુનઃ ॥ ૧૦॥

પ્રહ્લાદો ઽહરઃ સુભિક્ષ લલિતૌ શુરઃ શિલાદિત્યકો
બપ્પો વિક્રમ ભોજ ભતહરયસ્તે ગોપિચન્દ્રાદયઃ ।
માનાંશૂદય નાગ નીપ મલયાઃ પૃથ્વી પ્રતાપૌ શિવૌ
વિશ્વે વૈદિકધર્મરક્ષક ઋષિવ્રાતાઃ સદા પાન્તુનઃ ॥ ૧૧॥

પૈઙ્ગી ભૃઙ્ગિ મરીચિ કર્દમમુખાઃ કલ્માષપાદો યદુ-
ર્દુષ્યન્તઃ સુરથ સમાધિ નહુષૌ હર્ષઃ  પ્રિયાદિવ્રતઃ ।
અન્યે ચાપિ તુલાધર પ્રભૃતયો લર્કશ્ચ પારસ્કરો
વિશ્વે વૈદિકધર્મરક્ષક ઋષિવ્રાતાઃ સદા પાન્તુનઃ ॥ ૧૨॥

અગ્નીધ્રો હરિરગ્નિબાહુ સવનૌ નાભિર્વસુઃ કેતુમાન્
જ્યોતિષ્માન્ ધ્રુતિમાનિલાવૃત હિરણ્મદ્રમ્યકાહવ્યકઃ ।
પત્રઃ કિમ્પુરુષઃ કૃશાશ્વ, ઋષભૌ ભદ્રાશ્વ મુખ્યાખિલા
વિશ્વે વૈદિકધર્મરક્ષક ઋષિવ્રાતાઃ સદા પાન્તુનઃ ॥ ૧૩॥

પુણ્યાસ્તે મનવશ્ચતુર્દશ શુભાસ્તે વાલખિલ્યાદય

ઇક્ષ્વાકુઃ કુરુ રન્તિદેવ રઘવો રામો દિલીપોંઽશુમાન્ ।
પાલા પઙ્ક્તિરથો ભગીરથ કુસૌ નાગાશ્ચ સેનાદયો
વિશ્વે વૈદિકધર્મરક્ષક ઋષિવ્રાતાઃ સદા પાન્તુનઃ ॥ ૧૪॥

સિંહાલિચ્છવિ મલ્લશાહ સહિતાશ્ચન્દ્રાશ્ચ ચોલાદયો
ગુપ્તાવર્ધન વર્મદેવ સહજાઃ શાક્યા શકા વિક્રમાઃ ।
ચાણક્યશ્ચરકશ્ચ સુશ્રુત ભટૌ નાગો નૃગો માધવો
વિશ્વે વૈદિકધર્મરક્ષક ઋષિવ્રાતાઃ સદા પાન્તુનઃ ॥ ૧૫॥

અન્યે સ્વ સ્વ કૃતિપ્રસિદ્ધ્યશસો બ્રહ્મર્ષિ રાજર્ષયઃ
શત્રુઘ્નો ભરતોઽથ લક્ષ્મણબલી કૃષ્ણોદ્ધવૌ  સાત્યકી ।
પ્રદ્યુમ્નોઽપ્યસમઞ્જસો વૃષ હરિશ્ચન્દ્રૌ નરેન્દ્રાદયોઃ
વિશ્વે વૈદિકધર્મરક્ષક ઋષિવ્રાતાઃ સદા પાન્તુનઃ ॥ ૧૬॥

ઇતિ ઋષયઃ સ્તુતિઃ સમાપ્તા ।

Proofread by D.K.M. Kartha

*Rishistutih*
pdf was typeset on October 15, 2022

Please send corrections to *sanskrit@cheerful.com*